# शिव पञ्चाक्षर स्तोत्रम्

नागेन्द्रहाराय त्रिलोचनायभस्माङ्गरागाय महेश्वराय ।
नित्याय शुद्धाय दिगम्बरायतस्मै न_काराय नमः शिवाय ॥१॥

मन्दाकिनीसलिलचन्दनचर्चितायनन्दीश्वरप्रमथनाथमहेश्वराय ।
मन्दारपुष्पबहुपुष्पसुपूजितायतस्मै म_काराय नमः शिवाय ॥२॥

शिवाय गौरीवदनाब्जवृन्द_ सूर्याय दक्षाध्वरनाशकाय ।
श्रीनीलकण्ठाय वृषध्वजायतस्मै शि_काराय नमः शिवाय ॥३॥

वशिष्ठकुम्भोद्भवगौतमार्य_मूनीन्द्रदेवार्चितशेखराय ।
चन्द्रार्कवैश्वानरलोचनायतस्मै व_काराय नमः शिवाय ॥४॥

यज्ञस्वरूपाय जटाधरायपिनाकहस्ताय सनातनाय ।
दिव्याय देवाय दिगम्बरायतस्मै य_काराय नमः शिवाय ॥५॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसंनिधौ ।
शिवलोकमावाप्नोति शिवेन सह मोदते ॥